नं॰: ९८ - घ

सिद्धान्त कौमुदी सूत्रमूलः
वादचूड़ामणिः

पत्राणि — ३८

नं० : ६८-घ

वादचूडामणिः सिद्धान्तकौमुदी सूत्र मूल:

पत्राणि ३८

९८

३८ पत्राणि

नं॰ ९८ - घ
सिद्धान्त कौमुदी सूत्रमूलः

वाद चूडामणिः

पत्राणि ३७

नं. ५२८

सं. ५८६४

सिद्धान्तकौमुदी

...

॥ वादचूडामणि ॥

...

वादचूडामणिः

३००



श्रीमन्नारायणः

१

श्रीगणेशाय नमः ॥ उपदेशे० ॥ योगेन गतार्थत्वादनुनासिकसंज्ञासूत्रं नो
वर्णो मुखेन नासिकया चोच्चार्यत इति प्रातिशाख्यसम्प्रदायपरक्षणार्थम् ॥ स्व
रूपग्रहणं तु न स्यात् अर्थस्यैव कार्ययोग्यत्वात् दध्युपनेः किपि दधिकुल
मित्यत्रेदित्वान्नुम्स्यादिति न फलं धातुग्रहणं धातुपदे शाब्दव्यवस्थापानु
मर्थमिति भाष्योक्तेः ॥ स्वारः इति । ह्यादित्वादेचइचितः सौवर्णस्य सम्य इति
भाष्यप्रयोगात् । मुखनासिका ति ध्य एकः पुनर्वसू द्वावितितेषां म्वाङ्गत्व
सिद्धेः तिष्यपुनर्वस्वोरिति बहुवचनं ग्रहणं सर्वो द्वन्द्वो विभाषयेकवद्

शिवः

२

वनीति चेन्न। समाहारः प्राण्यङ्गादीनामेवेति विपरीतनियमव्यवारणार्थ
त्वात्। पीनितेरेयनागा एवेति त्वे विज्ञप्रभृतु प्रश्नोक्तिरेव द्वन्द्व एकवदिति वचना
द्दोषः॥ अनामिकाङ्गुष्ठमित्यत्र तु समाहारद्वन्द्वे देकत्वे ष। एवं च। कार्यासिद्
त्वे मनोरथ इत्यत्र इ एव दन्तहन्तेहतन्यायादुत्वं न स्यात्। अरमावित्यत्र तु नादि
चीति निषेधात् पूर्वसवर्णोस्याप्रवृत्तिरेवास्ति। रसाविति· ननु प्रकृतिभावेऽस्स
साचिति स्यात्· अन्यथा सवर्णे दीर्घ एव स्यादिति चेन्न। अतोऽनीति गुणे रत्वप्रवृ
त्तेः रखोरिति तु चिन्त्यमेव॥ आंगन्तु नाकारेणानिर्दिष्ट इत्यन्ये। नयोरिति· इरणेति

श्रीमन्नारायणः।

२ निषेधः षष्ठीसमासस्य कर्म्मधारयस्तु बहुलग्रहणात्क्वचिद्भवति। आश्वेति। प्रपन्नं भेदे
ननाऽक्कृत्वावित्यस्य प्रत्याख्यानम्लुत प्रश्लेषश्चिन्त्यः। अत्रेति। उरन्नदिति नकारे सस्ये
व ऋकाराशे भाव्यमानो भवति। अन्यथा गुणादि वा रणार्थ एव स्यात्। तपरसत्वेणस्त्व
कारग्रहणे नु फलाभावः। ~~[illegible]~~। वा धातौ वासा हृ प्रसंप्रयोगभेदे न। धाः पश्य
सीति। लक्ष्यत्वस्य प्रतिपदोक्तपरिभाषानुवर्णग्रहणेन प्रवर्त्तते॥ पादृत्यस्य लाक्षणि
कत्वेपि धातुप्रदेशे लाक्षणिकस्यापि कार्य्यदर्शनात्या होषः। भ्यादयः क्रिमः हितुक्
अत्र निपातनस्य मातिपदिकसंज्ञावकाशेति वार्त्तिकेन सिद्धेः। शिष्टे इत्यत्रात्वनिर

शिवः
२

त्तिः फलम्॥ उपदिश्यमानस्य एजन्तस्येत्यर्थे दोषाभावात् एवं यन्नीति प्रत्सुदाहार्य्यम्॥
इको गुणवृद्धी पदी यन्नियमार्थं स्यात्तदा सार्वधातुकार्द्धधातुकयोरित्यत्रैवोप
तिष्ठेत॥ अत्र इकोऽनिकश्च प्राप्तः मिदेर्गुण इत्यत्र अजोऽन्त्यस्यान्तिकश्च प्राप्ता
नोपतिष्ठेत न तदपवादत्वस्वीकारे तु अनेनिजुरित्यत्रापि जुसि चेति स्यात्॥ नक्षुधय
से तु मिदेर्गुण इत्यत्र परस्परविरोधाद्द्वयोरप्रवृत्तौ सर्वादेशो गुणः स्यात्॥ मिदइः
लघ्वीत्युपधे व्याख्यानेनुभिन्न इत्यत्रानिगल्लक्षणत्वकृगुणनिषेधो न स्यात्॥ स्था
नार्थेति। प्रमाणकृत्स्वत्वादेर्गुणत्वेपि रधगुपादानकृो नखीवर्द्दन्यायेन॥ परस्य

श्रीमन्नारायणः

३

यदिति। नस्मादित्युक्तस्यादेरितिन्यासेरामेरित्यत्रादेरैस्स्यात्। नचप्रथमन्त
स्मादित्यादुस्त्विति वाच्यं मू। ब्राह्मणा अश्वो इत्यत्र पूर्वसञ्ज्ञ सोप्यो प्रायत्ते:। यद्य
प्यष्ट नः अष्टै स्युक्ति ष्वमो।। इत्येवमथ उच्चार्यमाणा न्नानिमित्तयोरित्यर्थादत्रदो
षः सुपरिहरस्तथापि परस्यादेः स्थाने जायमानत्वाभावान्नु मोऽ स्यादित्यत्र
मैवतुल्ति भनि।। इत्येव।। उच्चार्यमाणस्यैव प्रत्यापकत्वान्प्रत्याहारयद्दलेषु

नहोच्यवाच्येषुलक्षणा। नतुजातिपक्षेलक्षणानिष्फला।। व्यक्तिपक्षेत्व

स्यचावनएत्वादएग्रहणमेवज्ञापयमितिचेदत्राहुः। अणाग्रहणं लक्षणापामे

शिवः

३

वतात्पर्य्ययाहकमप्रत्याहारग्रहणस्वास्यत्वावित्यादिनासुपलक्षणम्॥ भाष्यमतेनएए
कनकारादीनांऽभेस्त्वनुसादृश्यात्॥ विधेयविषयेतुलक्षणानास्तिज्ञापकाभावात्
गुणनामभेदकत्वेपिपरंप्रेसमत्वसंख्यायांविरोधः॥ अनचि॥ ननु॥ वस्यानुवृत्तौ
त्रिप्रभृतिषित्यादित्रिसत्रीव्यर्थास्यादितिचेन्न॥ वाक्यौ॥ वाक्य इतिभाष्योदाहरणैव
प्रमाणत्वात् अतएवान्वाद्यादिग्रहणम्पूजार्थम्॥ स्थानिवत॥ अव्ययस्याङ्गत्वादे
वेसिद्धम्॥ नचनन्तुमतेत्यत्रशर्वकार्य्यन्नेत्यर्थात्कथमङ्गत्वंलब्धाङ्गसञ्ज्ञकस्येत्य
र्थात् नचैवंहषणश्चइत्यत्राद्धोपापत्तिः॥ यस्मिन्परेभवत्तस्मिन्परेऽङ्गत्वेएवप्रवृत्तेः

श्रीमन्नारायणः

४

५

वस्तुतस्तु कारीषगन्धीपुत्र इत्यत्र हल इति दीर्घो सिद्धे सम्प्रसारणेनेनाङ्गः सञ्ज्ञाभावो
ज्ञाप्यते वक्ष्यते चेति। अङ्गेन प्रत्ययोऽत्राक्षिप्यते। अभ्याससञ्ज्ञा यातु न दाद्धे योऽसम्भवी
सन्नन्तस्य द्वित्वविधानात्। एतदुपपत्तिध्यर्थमेवासमस्तमसमासेऽङ्गाधिकारात्। सम्प्रसा
रणभाविनि परिपरत इत्यर्थे त्वत्र स्थानिवत्त्वस्य फलाभावः। पलोपादिग्रहणप्रभा
वातिदेशे ज्ञापकम्। विधिग्रहणं वा एतदर्थमेव। द्वितीयविधिग्रहणं तु पूर्वस्यैव वि
धौ स्यादिति। आदेशनिमित्तापेक्षपूर्वत्वग्रहणे वैयाकरण इत्यत्रायादेशापत्तिः।
ननु योऽनादिष्टादचः पूर्वस्तस्य विधौ स्थानिवत्त्वे निरायेति न सिद्ध्येत्। आदयते लि

द्वि॰ व॰

४

ल्लोपे। वृद्धेर्जग्ध्यादेशापत्तिरिति चेन्न। णिलोपात्प्रागेव वृद्धिप्रवृत्तेः। एवं ह्लोपा
विति तु णिस्थानिकवृद्धेर्लोपबलवत्त्वं। न च पदान्तं पदान्तस्थाने इत्यर्थे वृद्ध्व इत्यत्र व
लोपे स्थानिवत्त्वं निषिध्येतारणाविरुद्धवदिति भवत्वस्य तु न प्राप्तिः। वर्णाश्रये प्रत्ययल
क्षणस्याभावात्। वर्णस्याश्राधान्येन वतिप्रत्ययलक्षणमिति तु वार्त्तिकमतमस्या न च
णिलोपस्थानिवत्त्वाद् वत्त्वमन्यथा सतिटिलोपस्यापि स्थानिवत्त्वापत्तेः। यद्दत्वे तु
न स्थानिवत्। वेत स्वानित्यत्र तु त्ववारणाय पदेऽन्त इति व्याख्यानस्य भाष्यस्य
भाष्यस्य मते पदसञ्ज्ञायामपि पदान्तेति निषेधात्। वस्तुतस्तु न पदान्ताह लोपेणः

सन्निहितनिभाष्याद्धृत्तवुइत्यस्यानभिधानमेव॥ प्रातिपदिकादेवलिङ्गोत्पत्तेश्च अतः
एवापीपठदित्यत्र नशत्वन्न। यथावरइति। वरेग्रहणमार्द्धधातुकइत्यस्य परसप्तमीत्व
मपि ज्ञापयति। अन्यथा परनिमित्तत्वाभावात्किं तेन। यद्यपि पूर्वमेवाकारस्य लोप
स्तथापि वरेग्रहणादेव सम्भावितस्यापत्तिरेशः॥ प्रिराडेति। यद्यप्यनुस्वारस्या
दिस्वादचः पूर्वस्तथापि सवर्णग्रहणमेवस्यानिद्वारकपूर्वग्रहणं ज्ञापयति।
वस्तुनस्तु नः स्थानापन्नस्तत्कार्यं लभते इति भाष्याशयेनात्र स्यात्। निचत्वप्राप्ति
ः। एतेन सन्निवेशापेक्षमेतः सर्वत्र प्रवचनप्राप्ते नापत्तिरेशुमंशकपमित्युपास्त

म्। न च तस्य दोष इति णत्वे स्थानिवत्वापत्तिः। शीघ्रोपस्थितिकस्य णत्वस्य ग्रहणात्। व
स्तुतः स्ववर्णग्रहणमभ्यर्थमेव। काव इति। संयोगान्तलोपस्यासिद्धत्वाद्धलो यमां यमि
ति लोपः। एतेन संयोगानां लोपस्यासिद्धत्वान्नात्रोठः प्राप्तिरित्यपास्तम्। काव्य
शब्दे संयोगान्तलोपोपन्यासः प्राचामसङ्गत इत्यत्रैव तात्पर्य्यम्। गिरिवेडिति। क्र
लोऽकोपादिति लस्यानुरोधेनैव व्यवस्थापकम्। अमो मश्चित्यत्र भाष्यकृता म
कारस्यापि संयोगान्तलोपकरणात्। पत्तु गिरिवेडित्येवरूपमिति तन्न। कु
स्मयतेः कुस्म इति कौस्तुभे व्यवस्थापितत्वात्। ननु वाक्यार्थोऽमित्यत्र संयोगा

६ 6

न्त्वोपचारणापयणः प्रतिषेध इत्यस्यावश्यकत्वात्कथमात्याख्यानमितिचेन्न
तस्याशेष इति स्थानिवत्वेनैव सिद्धेः। एकस्यान्यत्राभावात्ति। यद्यप्युपनयनादिदृष्टा
न्तेन सकृत्प्रवृत्तिमाशङ्क्यातिदेशमादिदृष्टान्तेन प्रयोगान्तरेपि शास्त्रप्रवृत्तिरेव
भाष्ये साधिता न तु सकृत्प्रवृत्तिः। तथाप्युपनयवदेकस्मिन्प्रयोगे सकृदेव गुण इति
सिद्धम्। यद्यपि द्वित्वस्य वैकाल्पिकत्वाद्यावद्भक्तिः प्रयोगस्सकरस्तथापि तच्चैवे
तिनियमोऽसङ्गत इति भावः। सुधीति। सम्प्रसारणपूर्वत्वस्य तु न प्राप्तिरस्त्विधिता
त्। धात्वंश इति। नहि कार्यानित्यापादेकस्य न द्वित्वम्। सुध्युपास्य इत्यादौ तु तस्मा

त्रीवः ६

दिन्सु वर्णेस्येत्यादिनिर्द्दिश्यादिकोनिमित्तत्वम्। यद्यपि। कार्य्यमनुभवन्नेवकार्य्यो
निमित्ततयानाश्रीयतेतथापिभाष्यप्रामाण्यादत्रद्वित्वसामान्यस्येकत्वाङ्गाद्य
मू विधेयविषयएवोक्तपरिभाषेतुनिर्मूलम्। अषरूपंसाध्यमिति। द्वौब्राह्मणाविति
वदवश्यशब्दप्रयोगः। उरणरपरः। यद्यपि आननमनइत्यत्रसमुदायादेशत्वान्न
रपरत्वम्। तथापिअन्त्ययोरितिन्यायाद्वर्णस्यस्थानित्वम्। अदिचदिति। अत्र
समुदायस्यैवार्थवत्वाद्दिष्टाप्तिश्चिन्त्या। अतएव। नानार्थकइत्यत्र। नन्यास
विकारइतिविशेषणम्। अतएवसुविधापदइत्यत्राभ्यासस्यानर्थकत्वात्सुपि

सुनीतिषत्वञ्चेति भाष्यम्। अर्थवद्ग्रहणेऽइति। त्रिश्वादिसूत्रेऽम्भ्राजिग्रहणमुपानम्
। न चेविभ्राट्विभ्राजिति रूपद्वयपाप्तेरिति वाच्यम्। राजपाठेन सिद्धे एकत्र भ्राजि
भ्राजेरिति सुवचत्वात्। न चानुबन्धनिर्देशाद्यद्रुकिराराट्त्वोन्यत्र सत्वान्नायत्तिः शिन
पाशयेत्यस्य भाष्यानुक्तत्वात्। यद्धुकशब्दान्तस्सत्वाच्चान्चरापूर्वकजीवातेः
क्विपि षत्वापत्तिः। न च भ्राजेः काद्देशस्यापि राजेः सत्वेन कथं कृणादिग्रहण शिवः
निश्वय इति वाच्यम्। राजिभ्राज्युभयोपादाने सामर्थ्येन स्थानत्वमहानाम्भ्रा
जादिवच्च। स्थानिवत्सूत्रेण सिद्धम्। यत्तत्काद्धे यटेकाज्जुत्तरपदमिति णत्व

मत्त्वविधिरपि भवतीति तन्न। उत्तरपदत्वमात्रस्यातिदेशात्। यत्तु सत्त्वाभावेऽपि य
दूति प्रयोगानुपपत्तिः॥ किञ्च पूर्वसमुदायस्यापि स्थानिवत्त्वे तु स्वश्वशुरादी
रिनूदृष्यापत्तिरिति तन्न। योरुभयोरिति न्यायेनासिद्धेः॥ भियद्दृत्यत्र द्वयद्भिस्था
नित्त्वनुन भाविता नपारान्तेति निषेधात्। एङिःरूपपयग्रहणं व्यर्थं स्मानचेशि
वापेत्यत्रानुनासिके निकरलेऽनुनासिकनिवृत्तिः फलम्। अनुनासिकादीना
नुरूपाभावात्। अतएव चन्नहि शारोरूपवानि भाष्यम्। अकोकिदीर्घ इत्येवमुवच
मः न च व्यक्तिपक्षे व्यक्तीनामानन्त्यात् यथासङ्ख्यासम्भवात्। जातिपक्षाश्रयेतु

श्रीमन्नारायणः

८
४

स्यानत्वाचार्य्यादित्ति पूर्व्वग्रन्थासङ्गतिरिति वाच्यम्ः धर्म्मसामान्येन पयासङ्
यग्रहत्वेः प्रकृतिभावस्तु वैकल्पिकत्वान्नास्त्विति। एतन्मते मली वेत्यादेः स्व
गुनासङ्गतिः॥ कुमार्य्योरगारमिनिवपत्वरूपेण द्वयोरप्युपस्थितिरित्येके। प्रक
भाव एवानुमापकः स्यादिति युक्तं मू। अदसोमात्॥ आरम्भसामर्थ्यान्मुत्वादि
सिद्धस्यानेवकार्य्यकारत्वं यद्वेऽ लोप्रगृह्यस्येत्यनुनासिकनिवृत्तिः फलं श
ङ्गुमपचेतावमात्रमप्रयोजनं स्यात्तदा अणोप्रगृह्यस्यानुनासिक अदसो
नैत्येवाव स्यत्। श्रौतानि यातः किमू रे वासि। अत्र परत्वाद्धिकस्योमाभूत्।

शिवः
८

नचैनद्भावेदित्यप्रहत्याफले।विशेषइतिचेन।पटत्वादिकस्येनकायेपूर्व्वस्याप्रह
त्तिरेवस्यात्।यथाप्यन्तरङ्गत्वाद्दोदितिस्यात्तथापिसम्मुग्धावितिनिपातनपदानुवृ
त्तये।स्नोश्शुना।योगइति।सं॰ष्योगइति।नेनचिन्तम्युट्टैतेनमित्यत्रनातिव्याप्तिरि
तिकेचित्।तन्न।संहितानाधिकारात्।यवादिगणइति।नसोमत्वभ्रेइत्यत्ररकारस्य
श्लिष्टभत्वंवावोध्यम्।नचमन्मानित्यत्रभत्वापत्तिः।भयइतिवत्वेमन्द्वानित्यसे
वेष्टत्वात्।ककुनितिपाठेतुप्रकृतिस्वन्नपापरिह्रानप्रसङ्गः।नच्छिवइति।यथा
पिहृतेजश्त्वेचत्वेऽवरितार्थन्तथापियेननाप्राप्तन्यायेनायमादः।उक्ति।यद्यपि
पयोह्रद्शोत्रियाद्यसिद्धकार्य्यकालत्वेनभयोरपिसमानदेशस्थत्वेनयापिपाठक्रे

१ मेण प्रवृत्तिः ॥ मो। नित्यग्रहणं व्यर्थम्। विकल्पद्वयमध्ये पाठात्सिद्धेः। नचैवमपि प्र
रेन इत्यादीनामपि नित्यत्वापत्तिः। उत्तरवाक्ये दृष्टान्तद्वयवद्धितेऽ मोऽन्त्यस्त्वादित्य
त्रैव विकल्पयोर्निवर्त्तनात्। परमस्येष्टापत्तिरिति। अत्रोत्तरपदस्येति निषेधान्नपदत्व
मापत्तु अपदादावितिपर्युदासात्सप्तदान्नविधावेवायं निषेधः। किन्तूत्तरपदस्य
कार्यित्वेऽणापान्निषेधः। अत एव माषकुम्भवापेनेत्यत्र पदव्यवायेऽपीति निषेधइ
तितत्त्वा। पजादौ स्वादौ कथमपि पदत्वेनेत्याश्रित्य वार्त्तिकस्य भाष्ये प्रत्याख्यानात्। त्रिवः
उत्तपदशब्दस्तु समासचरमावयवे रूढः। अत एव रुण्वागदवद्दमित्यत्र मध्यमपद १
कुत्वादि। विसर्जनीयस्य इति। नचावसाने संहिताविरहात्सत्वासम्भवः। पूर्वस

वर्णेनैव संहिताप्रसङ्गात्। अनुस्वारेति। हरिम्भजतीत्यत्र जश्त्वन्नेन। अट्कुप्वाङिति
सूत्रे नुम्ग्रहणेनानित्यत्वज्ञापनात्। नायस्येति। नाहिमामित्र आशङ्काद्वारेण्विशे
नश्छवि। अप्रशानितिपर्य्युदासेन तु नान्तत्वमलभ्यन्तेत्सरशास्त्रात्सालिकस्य ग्रह
णापत्तेः। शर्परे। विसर्जनीयस्य सोऽर्थात्यत्व्यसे तु वाद्विसर्गग्रहत्यर्थानापत्तिः। सो
पदादौ। अपदादौ स्थितयोः कुप्वोरिति व्याख्यानेन तु अध्याहारक्लेशः। अन्यस्यासम्भ
वादिति। न च डरः कायतीति डरः केनेत्यत्र तत्सम्भवः। कवर्गपवर्गादावपदइत्यर्थेन
सिद्धे रादिग्रहणम्पदत्वयोग्यप्रातिपदिकानवयवस्येत्येतद्दुर्यमहाइ दुदुपधस्या अप्र

१० 10

त्ययावयवो यो विसर्ग इति समानाधिकरण्यम्। भ्रातुष्पुत्र इति। ननु व्यधिकरणान्व
यवादि भाष्यमते कथं सत्वप्राप्तिरिति चेन्न। पूर्वान्तत्वेनाप्रत्ययत्वात्। द्वित्रि। साहचर्य
न्धानुपाठे सह पाठः। ससजुषो रुः सजुषशब्दान्तमिति। यह णवतेति प्रत्ययविषयः। पूर्व
त्ति निमित्ते वसिद्धे स पूर्वान्तेति सूत्रमस्याम्नानम्। समासप्रत्ययविधावितिनिषेधस्तु
वार्त्तिककृतोक्तः। तेनैवायन्निषेधो न प्रापतेरस्य। मयूरेशवद्रावादिति। पूर्वान्तस्य वा
दिनिरिति वाच्ये योगविभागो न मानम्। वस्तुतस्तु यजादौ स्वादौ पूर्वम्पदन्तेत्याश्रित्य
भाष्यवार्त्तिकप्रत्याख्यानात्परमसज्जन्मामित्ययवान्तर्वर्तिचिभेत्यापदत्वात्सिद्धे

भोभगो। भोहरिहरौ इत्येतदर्थन्निपातः। हे भो इति। सहप्रयोगार्थम्वार्त्तिकम्। अत्रो
ह्वावस्येत्यत्रानर्थकत्वान्नाऽभोन्यावस्येत्युक्तौ तु हद्धापत्तिः। ननु प्रभोरिदमित्यत्रय
त्वं स्यात्- अनर्थकत्वन्तु भोशब्दस्य सर्वत्र तुल्यम्प्रतिदेशे कथं हलेनु वार्त्तिकनिष्पन्नस्या
सङ्ग्रह इति चेन्न। अर्थवतो भोरशब्दस्येत्यर्थान्। हृ ह्लक इति। द्विः सदानुवृत्तस्य नवुवृत्त्योः फ
लभेदादस्यानभिधानम्।। अर्थवदधातुः।। सात्यचदरि यन्ति साङ्गलम्प्रत्ययपर्युदासेन ज्ञा
पकम्। प्रत्ययान्तपर्युदासे कृत्तद्धिते सूत्रे तद्धितान्तस्य सञ्ज्ञाविधानज्ञापकम्।। नच
इरियादित्येतदर्थन्नदिति वाच्यम्। एकदेशविकृतन्यायेन सिद्धेः। कृदन्तस्य सञ्ज्ञाविधा

ननु लिङ्लुङित्याद्यर्थम् । लोके ऽर्थवत्त्वं तद्धितान्तस्यैव भिन्नार्थानामेकार्थे वर्तमाने मेकार्थीभा
वः । तत्र भिन्नार्थत्वमस्त्येव नत्वर्थंगत्या । अत एवैकशेषेपि वृत्तित्वम् । धनश्च वनमिति । नन्वव्ययादा
प्सुप इति ज्ञापकादस्याव्ययस्य सुबुत्पत्तिः । प्रतिवर्णमनुमानाभावः । एकवचनसञ्ज्ञाया
अन्वर्थत्वात् । अत एव प्रातिपदिकाधिकाराभावेपि सख्याया उक्तत्वान्न तिङन्तात्स्वाद्य
इत्युक्तम् भाष्ये इति चेन्न । न केवलेति न्यायेन स्वाद्यापत्तेः । अत एव धात्वके इत्सत्र एधामि
सतस्सुबुत्पत्तिरुक्ता भाष्ये । पचतीत्यादौ तु न सुबुत्पत्तिः । केवलेत्यनेनावाधितसंख्याकाए
वप्रकृतेर्ग्रहणात् । प्रत्यय इति महासञ्ज्ञात्र पुनर्नः । पुगित्याद्यागमादीनां वारणाय प्रमा

ट्टीनां प्रत्ययाधिकारसामर्थ्यात्प्रत्ययत्वमिति नुम्बुगादावपि तुल्यम् · तस्माद्योतकत्वं छ्कु
माद्दीनामनर्थकत्वं नुगादीनां प्रत्ययत्वे मानाभावः · महासंज्ञात्तु श्नुसन्तु शेषादेव · अथानुरि
किम् · अहन् · नलोपो माभूत् · सुचुन्नश्चिस्तु नोऽज्ञा · अपवादेऽस्मिन्नुडादिभिर्बाधात् · राज्ञेति ·
कृदन्तत्वे न तु नात्र निर्वाहः · उत्तरसूत्रे प्रत्ययग्रहणानुवृत्तेः · अन्यथा सुराज्ञेत्यत्राप्रत्यय
निषेधे समासग्रहणमव्यर्थमेव · न चैवमुत्तरार्थमप्रत्ययग्रहणस्यावश्यकतया प्रत्ययान्त
स्य चेन्नद्धितान्तस्यैवेति नियमेन कथन्तत्प्रत्याख्यानम्भाष्य इति चेन्न · बाध्यसामान्यचि
न्तया उत्तरसूत्रमप्राप्तप्रातिपदिकत्वस्यापि तद्धितग्रहणकृतनियमेन व्यावर्त्तनात् · कारणेऽ?

त्यत्र सर्व्वान्तवत्वेन प्रातिपदिकत्वेपि कार्य्यकालपक्षस्याश्रयणात् ॥ सप्तम्यधिकरणे चे
ति निर्द्देशात् ॥ ह्रस्वो नपुंसक इति प्रातिपदिकग्रहणाद्वा सिद्धम् ॥ सुपस्तु ॥ गमकाभावान्न प्राप्ति
ः ॥ मूलकेनोपदंशमित्यत्र कृद्ग्रहणपरिभाषया न प्रातिपदिकत्वम् ॥ समासग्रहणकृतन्नियमे
न परत्वाद्बाधात् ॥ राजकुमारीत्यत्र स्त्रीप्रत्यये तदादिनियमाभावेपि समासग्रहणेन्न वि
ध्यर्थम् ॥ राजकुमारीसु इत्यवस्थायामेवान्तरङ्गान्नपीति न्यायेन प्रातिपदिकत्वप्रवृत्तेः ॥ अ
यमियान्नित्यत्र प्रातिपदिकत्ववारणाय प्रकृतिप्रत्ययभावानापन्नसमुदायविषयकोनि
यमः ॥ बहुपटव इत्यत्राप्युक्तनियमाप्रवृत्तौ प्रातिपदिकत्वसिद्धिः ॥ प्रथमनियमेपि राजपुरु

पावित्तस्यानर्थकत्वप्रातिपदिकत्वम्· अनुकरणानांतुद्दत्स्योपस्थापकाभावान्नार्थवत्वं
हृत्स्यापदजन्यपदार्थोपस्थितिः कारणमितिनियमेनुमानाभावः· शाब्दबोधेतात्पर्यस्यनि
यामकत्वादेवजातिप्रसङ्गात्· ग्रायहणन्दृष्टामात्रांइत्यत्रसमुदायात्सुबुत्पत्त्यर्थमित्य
स्यनुपपत्त्याभावः· प्रत्येकमपिपदत्वनैकपदान्तरितत्वप्रयोजनात्सिद्धेः· सामिवचनेप्रतिषे
धानर्थकत्वप्रकृत्यभिहितत्वादिति· नसामिवचनस्यभाष्यप्रत्याख्यातत्वाद्द्यन्तस्वार्थिक
कृतिमानाभावः· हरिशिखाहरिमित्रेकेत्यस्यभाष्येप्रत्यासन्तरत्वेनसाधितत्वान्ऽत्रभवन्हलस
फलबाह्यनन्विन्त्यम्· बहुगोमत्वेति· अत्रविभक्तेःप्राक्कपसमासः· समासान्तानामार्थभा

चेन प्रातिपदिकादप्युपपत्तेः सुपो लुकि चकृत्वर्मिके सज्ञासुप इति निषेधादित्वानापत्तिः तस्मा
द्वचनसामर्थ्यात्सुबन्तेन एव समासः अग्निपूर्वः एकः पूर्वपरयोरिति निर्देशादेरेव पूर्व
त्वं सिद्धम् अट् कुप्वाङ् आक्षरसमाम्नायिकैर्व्यवधानेऽचेदड्डादिभिरेवेति नियमेऽङ्भक्तेरव्य
वधायकत्वात् हत्वा म्मान्तृणामित्यत्र णत्वसिद्धेः अवर्णान्तस्येति वार्त्तिकल्लभ्यम् यस्मात्प्रत्ययः
यस्माद्धातोः प्रातिपदिकाद्वेति व्याख्यायत रूपस्या श्रुख्यायणेति निर्देशेन साधने फलाभावः
यथाकथाचमित्यस्यत्र णत्प्रत्ययस्य णित्वसामर्थ्यादिति चाश्रयणीयं स्यात् आदेशप्रत्ययः
सा- सिवसीति घसेः षत्वविधानमादेशस्येत्यर्थमानम् सातेः षत्वनिषेधः प्रत्ययावयवस्ये

त्सर्ध्यमानम्· कसर धूसराद्यौ क धूमादिभ्यः सरन्निति व्युत्पत्तिर्नाश्रीयते वा कृत्स्न कालं
रामेष्विति· इधिसेध्या वित्यत्र यद्वाराद्दिरिति यत्रमीसमासस्या—त्र न निषेधः सात्वस्य ष
रिति सायकान्· स्यादिष्विति· यस्य पद सञ्ज्ञेति व्याख्यानाद्राजपुरुषेष्वित्यत्रापि न निषे
धः· एतन्मते ऽजर पदत्वे चेन्निनिषेध ऽन्तर यद तस्य कार्य्यित्वे· व्याति सेद्रूस्यत्रैक देशावि
कृतन्यायेन पदत्वम्· पयपि कर्म्म व्यतिहारे वकुवचनन्त्याय्यन्तथापि व्यस्तोभवती
त्यर्थादेकवचने वाधकाभावः। रामाविति· एक देश विकृतन्यायेन पदत्वम्· ऽभयत
आश्रयणोऽन्तादिवत्वाभावादेकदेशविकृतन्यायेन राम शब्दस्य तु न प्रकृतित्वम्·

एकपर्य्यन्तस्यायमित्यभिज्ञोदयात्. सर्व्वादीनि. यज्ञोपवीतीभोऽस्यतामिति सन्निधाना
देवतद्गुणत्वम्. उभकाविति. उभयशब्दाद्विहिनः कप्रत्ययो द्वित्वविशिष्टमेवाभिधत्ते
. तेत्रनसोनुविभक्तान्ताद्विहितावधिकारणादिविषयकबोधजनकावेवेनिनद्विव
चनम्. परेषामित्यत्रदेशान्तरनिष्ठत्वादिकमेवार्थः शत्रुत्वादिकोर्थः पराङ्क्ति.
येनविधिरित्यनेनतत्सिद्धमिदम्. ननुवकुरजरम्-द्वेतिङ्ऽव्याप्तिवारणायतदुत्तरपदस्य
त्वचेतिवाचनिकमेवास्त्विति चेत्तथासतिपरमात्तिमहा।मनित्यत्रसान्तमहतङ
तिनस्यात. नहीरत्नत्र. नापितद्गुत्तरयम्. अक्षोपोनः. नन्वत्रकथंपजादिमस्य १

जाद्दि प्रत्यय आक्षिप्यते हृषरावपोरिस्मत्रापि भत्वाद्दिति चेन्न· अङ्गाभ्यांन्तद्दाक्षेपात्·
नन्वनुवादत्वात्कथमनोयजाद्दाविति विशेषणमितिचेन्न· यजाद्दोपरेउनन्तस्याङ्गस्याका
रस्यलोपइत्यर्थः· तत्रयेननाव्यवधानन्यायेननकारमात्रस्यव्यवहितस्यलोपः· रषा
भ्याम्· पूर्वपदस्यान्निमित्ताद्वेत्संज्ञामामवेतिनियमेनसिद्धे समानग्रहणमनर्थकं
म्पूर्वपदशब्देनोत्तरपदस्याक्षेपान्मात्रभोगीणइतितद्धितस्यभवत्येवणः समासचर
मावयवग्रहणात्कर्मनिस्यत्रापिनियमः· पूर्वस्मादपीति· मथित्वयतेः क्विपिमथिदः
तेनवरैतिमथिनिकइत्यत्रकादेशनिवृत्तयेपत्वमि समासः। किन्त्वात्नड· एव म्रेजुगिति

अभोभुवुरिति पङ्क्तु · क्विवक्ष्यमाणत्वात्सिद्धिः । सिञ्जिमिल्लकञुस एवान्त इति नियमात् · न
स्सदोष इति · सं॰ योगादिलोपाणि पेल्लोपे च त्रस्तव बहिरङ्ग पणो ऽसिद्धत्वात्संयोगादि पणो
वारणे नु कुस्मयते ः । कुस्मइत्यत्र संयोगादिलोपे णिलोपः स्यान्निवद्धोध्मः ॥ नत्वे निगाल्मते
· अत्रान्तरङ्ग· त्वात्सिलोपात्पूर्वं कृतत्वं सिद्धम् · किञ्च धातोस्तत्रूप ग्रहणे इति न्यायाद
जादौ प्रत्यये इत्यस्यार्थात्प्रत्ययत्वमिहोक्षणमपि सुलभम् · तस्मात्स्नायते इत्यत्रायत्ति परस्से
ति त्नत्वम् · नलोपः · अन्तग्रहणं ज्ञापयति क्वचित्पदस्यान्त्यावयवषष्ठीति भाष्यम् · ल
क्ष्यानुसारि व्याख्यानेन सिद्धे तदर्थम् · हल्ङ्याब्भ्यो · –हल्ग्रहणमपार्थम् · न हि ङ्· सम्भु

ष्णोरिति ज्ञापकेन नलोपे संयोगान्तलोपस्यासिद्धत्वाभावात् · यत्र नकारविभक्त्यो

रानन्तर्येव सिद्धत्वज्ञापनात् · अविर्भवि वानित्यत्र एतस्येति प्रश्लेषाद्दोषः · अभि

नोत्रेति · उत्वमनु संयोगान्तलोपे एत्वे इति सिद्धकाण्डे पाठात्सिद्धम् · यदि तु डस्त्वात्र

दिस्यत्र संयोगान्तादिति लोपस्यापात् · वस्वादिषु दत्वं सिद्धमिति वचनस्य निष्फलत्वेन द

त्वस्याप्राप्तेरित्युच्यते तदाह न्यासः · सऐरिसते सूत्रमस्तु · सुराः सुरासौ इत्यत्र धातुसका

रस्य प्रत्यापामत्ययोरिति परिभाषया वारणात् · नन्वविभारास्यमित्यादौ ढलोपे धू

वसिमोनिदीर्घे संयोगान्तलोपस्यासिद्धापत्तिरिति चेत्तर्हि हल्न्यायः सुतिसिहस्विति

सूत्रमस्तु। आआ वितिप्रश्लेषे दीर्घग्रहणं व्यर्थम्। इग्यञ्चाया ईगङ्केरित्याद्दोतु सूत्रम
नेपि सम्भानादिकारहूपस्यैव दीर्घस्य ग्रहणाद्दोषः। प्रत्ययलोपे। वार्त्तिकमतेऽच्चवि
धौ अत्रलोडित्याद्दो विधिपर्यायमिदम्। सुद्दषत्प्रासादवत्त्वत्र तु साहचर्याद्भक्तिभिन्न
स्यैवासो ग्रहणाद्दोष इति वार्त्तिकमतम्। भाष्ये तु नियमार्थरमेऽतत्। अत्रणेडिसा
दौ नाभ्यस्तस्यावीत्यप्योतु हल्लेरदोषः। आणीरित्यत्र शाम्नः क्वावितु पसङ्ख्यानादी
त्वम्। ननु यदि प्रत्यययाप्रत्ययस्य साम्परगाङ्क्षा पर्युस्यान्महाद्द्वितीयप्रत्ययग्रहणञ्चार्थे
स्यात्। प्रत्ययलोपेन हत्वक्षणामिसेव सिद्धे रितिचेत्सत्यम्। सत्येव प्रत्ययग्रहणेऽप्रम

थेस्सम्पद्यते· अन्यथाप्रत्ययलोपेपित्वतत्कार्यंस्याद्दितित्यर्थोऽज वेहितमित्याहैविध्यर्थमेव
हंस्यात्· पूस्मारवेभ्यो· आच्छीनद्योरितिसूत्रस्वरसाहचर्ययोरपिसञ्ज्ञा· अन्येतुस्वघुगुरु
समसवर्णमात्रस्याविनदीसञ्ज्ञेनदन्तस्येतिभिन्नावधिकत्वाद्बाध्यबाधकभावेनातभा
व्यविरोधाद्वर्णसञ्ज्ञापक्षस्यैवन्यः· अन्तादजाद्यदन्तंविप्रतिषेधेनेतितुवार्त्तिकका
रस्यव्यवहारइत्याहुः· अघिश्नुः घोरितिनश्नुभुवोविशेषणमव्यभिचारात्· आरभ्या
नणिजन्ताल्लिपिसुभुइत्यत्रनुटिलोपस्यस्थानिवत्वान्नोवङ्प्राप्तिः· वेरपृक्तलोपा
दिति· नन्वहृक्षोयात्प्रागेवापृक्तलोपः प्राप्नोतीतिचेन्न· आर्द्धधातुकइत्यस्यपरत्वविषय

यस्स त्समीत्वोत्वागे वाल्लोपमह्वाल्ले :· विप्रतिषेधाश्रयणसामर्थ्याद्देयनित्यस्याप्येके
लोपस्य बाधः तुमश्चिरेति · ननु गुणदीर्घोत्वानामपवादा इति सिद्धान्ते बाधसामान्यचि
न्त्याश्रयणात्कथं रादेशस्यानुद्विधायक इति चेत्सत्यम् · अत एव न तत्र च तस्य इति सिद्धा
प्रकान्तुजाब्धसाधितः गौरिति · प्रियरव्ययति त्सैत्वौ सत्रनियमान्नाव्ययत्वम् · सर्वनाम्न
:· अमुष्टि · सुमौ अमुष्ये इति स्त्रनस्यात् · तीपस्यद्वि · स्तस्यूपसंख्यानात्सिद्धे विभाषा द्विती
यास्त व्यर्थम् · ननु द्वितीयाभागे द्वितीय इति स्वार्थिकानित्यात्क्षणिकानित्वाद्वार्त्तिकस्या
प्राप्तिरिति चेन्न · तस्य स्वभावान्नुंस्यैव महत्ने :· अतिरवद्वायेति · आपोलाक्षणिकत्वेनया

द्वारणन्नुनयुक्तम्· अतिदेशविषये लक्षणप्रतिपदोक्तपरिभाषाप्रवृत्तावतिदेशस्यैव
वैयर्थ्यात्· गुणहीनत्वानामिति· बाध्यसामान्यचिन्ताश्रयणान्मध्येऽपवादन्यायाश्र
यणेनुगुणस्यापादेव· प्रिप्रतिसेति· स्त्रियां कृत्तिरत्र सूत्र पूर्व्वं गत्या· नन्वस्मिन्नर्थे गुण
नाम्नपरार्थत्वादिति न्यायविरोध इति चेन्न· गुणः कृतात्मसंस्कार इति न्यायात्· जश्श
सोः· शसयिसुवेव· निरनुबन्धकपरिभाषात्वनुबन्धानुच्चारणे प्रवर्त्तते· तेनेह न कुण्
श इति· ननु एकवचनशब्देन परिमाणशब्दानाङ्ग्रहणमिति वक्ष्यमाणत्वात्कथमत्र श
सिति चेन्न· जातिशब्दादपि शसस्तत्रैव वक्ष्यमाणत्वात्· कुण्डपरिमितधान्यादिपरत्वे

परिमाणत्वस्यापि सम्भवाच्च॰ अतिजरसमिति॰ एतच्चाप्यादन्तरङ्गोपि न्यायः प्राप्तः सुपो
धात्विति लुग्विषयः॰ सनीत्वं इत्यादौ त्वन्तरङ्गत्वाघञु॰ किनस्योपानयम्परवङ्इत्यत्र
लुक्तश्छिनत्तु कीर्ति आकारस्य लुक् ह्रस्वस्तु न भवति॰ सामासिकादिति श्रेयसीकुलमिति
गोस्त्रियोरिति सूत्रे ईयसो बहुव्रीहौ पुंवदिति वचनाद्ध्रस्वो न॰ उपसर्ज्जनह्रस्वमात्रनि
षेधे तु न त्वकरणे ह्रस्वन्तस्यैवावश्यत्व॰ उपसर्ज्जनह्रस्वएवेति॰ एतत्सूत्रे पूर्वस्य पाठात्॰
अन्ये तु॰ ह्रस्वमात्रस्यायन्निषेधः॰ वा तु ह॰ अस्माद्धि कस्यापवादस्योत्सर्ज्जकम्प्रति
नासिद्धः॰ एतेनासिद्धत्वाद्वचनसामर्थ्याच्च घत्वठत्वोभयं सिद्धमित्ययास्तम्॰ अत एव

संयोगान्तसंयोगादिलोपेन । वाकुहादीनामिस्तु मौ तु यङ्लुकि न स्यात् । गणनिर्देशात् । दे
धुक् । एकाज्ग्रहणे ससस अपि भषभावः खलु भवत्येव । अजर्थोदिति भाष्यप्रयोगेणान स्थानित्व
त्वात् । वसुस्त्वंसु । स्नसुध्वंसु भ्यापि चि संयोगान्तलोपेनुदत्वान्न । तस्यानभिधानात् । अतए
व ससेर्यत्य स्यान नुत्वलोपयिवानि स्यत्रैव दत्वापत्तिनुमाभाष्ये । सादुरिति । अपदान्तस्य
मूर्धन्य इत्यतः प्राक्सादेः सो मूर्धन्य इति सूत्रमस्तु । तेनात्र पदान्तत्वाभावान्न षत्वप्राप्तिः
सुधुभ्यामिति । उत इति तपरत्वसामर्थ्याच्छन्द इति दीर्घेण । यन्त्रूल ङ्कै पदे ङि ग्रहणान
नुत्वलिपक्षे अचोऽधिकृते दीर्घायषिरितन्न । ङि इति ग्रहणानुहानौ ब्रश्चादि सूत्रे छ ग्रह

श्रीमन्नारायणः

१९

णत्वैयर्थ्यापत्तेः॥ न च तत्वमाद्रिस्सत्रस्मो लुकि शादेशाभावेऽप्यस्य ग्रहणमिति वाच्यम्॥
द्विर्निर्मितलक्षणादेशस्य पुंवोरत्वात्। एतेन दिवादिभ्यो यङ्लुक् - नास्ति क्षणे भावाभ्यामभेदे
भेदादित्ययास्तम्। प्रियत्यग्रामिति। यद्यप्यत्रापि षड्वर्थवाचकशब्दान्तरत्वमस्त्येव। तथापि
प्रधानेनोपस्थितस्यार्थस्य ग्रहणमित्येवाशयः॥ किमः कः। इम इति न्यासेऽपि इमौ इत्यादौ
वाङ्क्परिभाषया नाव्याप्तिः॥ ककइत्नि। प्रातिपदिकाधिकारादन्तरङ्गत्वाच्च सुपः प्रागेवाक
च्। वस्तुतस्तु काद्शाद्यति स्तनमस्तु कुत्ति होरित्यत्र ङशान्ति होरिति। इहनः। ह्रवत्र हायत इ
त्यत्राकृतसार्वधातुकयोरिति दीर्घाभावस्येव। वृत्रहणाईत्यत्र तु अनुनासिकस्य क्वीसा

१९

षिदीर्घेण· एकाज्झलोरेति· तस्य दोष इति· एतत्वेस्या नित्यत्वादेकाचचम्· ननु एकाज्झलोरे
ति सूत्रस्य प्रतिकूमति चेत्स सिद्धत्वात्कथमत्र प्राप्तिरुक्तेति चेन्न· एकाचचाभावेनोक्तसूत्रा
प्राप्तेः प्राप्तिपदेकान्तसूत्राप्रसक्षये दन्न्याप्यमित्ययात्तम्· पथिमथि· ननु भाष्यमानइति
परिभाषया अणुदित्सूत्रमात्रविषयत्वे अप्रत्ययइत्यनेनैव गतार्थता· अतएव भाष्य
कृताज्ञाप्यमिदं सुकरम्· अन्यथोत्कं वेत्येवावश्यत इति चेन्न· तस्यैतस्याख्यानार्थे वक्ष्या
पकोपन्यासात्· सुपथीति· इनस्त्रियामिति नवक्ष्य समासान्तविधेरनित्यत्वात्·प
-थानमात्मनइच्छतीति एकदेशविकृतस्यानन्यत्वादि· पघपिदिशिषद्रूपोपादाने सर्वत्र

श्रीमन्नारायणः

२०
20

गौणमुख्यन्यायेऽभिन्नपदार्थादृत्तिन्यायश्च॰ अतएवसर्व्वादिसूत्रेउपसर्ज्जनप्रतिषे
धः प्रत्याख्यातः॰ राजश्वशुरादित्तिपत्नसम्ज्ञाश्वशुरान्नभवन्ति॰ अत्राहुः॰ द्विविधंगौण
मप्रसिद्धत्वंसदृशलक्षणपार्थबोधकान्न॰ तत्रद्वितीयमादायकार्य्यवायन्नायद्
तिप्रवादः॰ प्रकृतेतु इत्तोदित्तिलपरकरणान्नास्यप्रवृत्तिः॰ निष्कापांसेहीति॰ लिजन्ता
दनिट्त्निष्ठानभवति॰ नचत्रयेस्तनीइविकल्पात्सम्ज्ञापितइत्यचतन्सम्भवः॰ यस्यवि
भाषेत्यत्रैकाजित्यनुवृत्तेः अमयादहरिदितद्दसत्त्वापिनस्यात्॰ दद्रिदितद्दसत्त्वादे
षः॰ द्विन॰ चोरित्यत्रग्रहणीतिसम्बध्यनतत्र॰ एतेनैवात्रकुग्रहणंव्यर्थमित्यपास्तम्॰

२०

तद्दोः॰ अनन्त्ययोरिति व्यर्थम्॰ पुनः प्रसङ्गविज्ञानेन सदातन्त्वघत्वसिद्धेः॰ सिद्धं ज्यायानि
ति॰ उऊ याङ्गस्तत्र दीर्घवारणाय प्रक्लिकृ तौ स्तनु हल्लेः कथं तस्याप्तिः॰ उनुपेत्य च छान्दसत्वा
त्॰ ननु जानातीत्यत्रातोपणि इति दीर्घाऊ अनन्त्यस्य प्रश्नाख्यानयोरिति प्लुतानापत्तिः॰ ज्ञा
पकपरभाष्यप्रामाण्येन प्लुतापत्तेः॰ पुष्पदन्तस्य ज्ञाम्॰ शितेसर्वादेशार्थम्॰ अकारस्या
कारे कृते ननु अनादेश इति निषेध एव स्यात्॰ न च यो ब्बुङ् सोति सूत्र्यतामेकवचनत्वादिना
सादृश्यग्रहणापत्तेः॰ अ अ इति प्रश्लिष्टनिर्देशात्तस्यादेशेन॰ षष्ठ्यादिविशिष्टयोरिति॰
एतच्च सर्वस्य पदस्येत्यधिकाराल्लभ्यते॰ यद्यपि अनुदात्तं सर्वमित्यधिकादि सुकरम्भाष्य॰

श्रीमन्नारायणः

२१

तथापि तस्यैव विभक्तिविपरिणामादित्याशयात् । सर्व्वस्य द्वे इति सर्वग्रहणन्तु सम्पूर्णार्थ मेव । भक्त इति । हरिस्त्वाम्मान्त्रायत इति तत्रैणानेकसम्बन्धान्नभिन्न वाक्यम् । साम ान्नितम् । विधिमसम्पन्नग्रहणाल्लदन्तेत्यध्येमहासञ्ज्ञात्वञ्चिन्त्यम् । त्यादादि । सद्रूवप श्यति तादृशः कर्त्तरि क्त्रिदिति नियमादारम्भसामर्थ्यात्कर्मणि । त्वधिकारवाधः । संयो गान्तेति । काव्यमित्यत्र तु पूर्व्वपूर्व्वमन्तरङ्गमित्याश्रीयते । स इष इति । वसोन्निर्द्दिक रणात्वनुवन्धकस्यापि वसोर्ग्रहणम् । पुंसा । विवक्षित इति । तेन परमपुमानित्यत्र स म्यासान्तोदात्तत्वमकारस्यैव भवति । अन्ये तु परसप्तमीपक्षेण क्तजवृहपरिभाषया

२१

कारस्य नप्राप्तिः पुमानित्यत्र अप्राप्ति पदिकरोन भवति॰ बहिरङ्गस्यासुङो सिद्धत्वादु
मुनो नित्वन्नुतरानत्यत्वशाम नायेत्याहुः॰ अदस औ॰ सोरे वौत्वं तु असवौस्त्री
इत्यत्र इत्सत्वप्रसङ्गः॰ आ ... बिति प्रश्लेषे तु कारिकेत्यत्रापीत्वं न स्यात्॰ नमुने॰ नेति
योगविभागोऽत्र नन्त्यमुपदेशोऽजन्विती सञ्ज्ञायामासिद्धत्वम्॰ अनिच् शुङ् इत्यत्र श
स्य सञ्ज्ञायामन्वसिद्धत्वमस्त्येव॰ न च लशक्वेत्यत्रोपदेशपदानुवृत्तौ भियः क्रुकनि
भीलुकइत्यत्र रन स्यात्वापत्तिः॰ फलाभावात्॰ आशीरिति॰ आशासः क्वावुपसंख्याना
दित्वं शासइदङ्हलोः॰ तिनु अङ्हलोः॰ साहचर्यात्॰ शास्त्यनुशिष्टादिविषयस्यैव॰ अन्यथा आशा

श्रीमन्नारायणः

स्तेडूसत्राणीत्वात्प्रवृत्तेः॰ अन्वादेशाडिति॰ सूत्रे एवैनठ्यत्ययः एनाविस्तादिस्य लाघवत्वेनसि
द्धम्॰ नचयेननाम्नाप्तन्यायेनत्स लाघवत्वस्याप्रवादृएनदितिवाच्यम्॰ द्वितीयास्वविस्
त्रविषयसप्तम्याश्रयणात्सूत्वेमेवप्रवृत्तेः॰ एनच्छित्रइत्यत्रतुबहिरङ्गसामासिके
लुकिनभवति॰ वैपरस्तुनत्नुमतेतत्राङ्गाधिकारणादेनच्छित्रकइत्याह॰ अव्य
यकृतोभावइति॰ अत्रतुमर्थेइत्यनुवर्त्तनेतुमर्थश्चभावएवनकर्त्ता॰ कर्त्तरिक्रादि
न्येवसिद्धत्वादितिभावः॰ नवभावार्थत्वेपिवध्येइत्यत्रपक्षेरव्यः व्यत्ययाश्रयणा
त्॰ क्रन्मेजन्तः॰ अन्तग्रहणंयोपदेशिकत्वप्रतिपत्त्यर्थम्॰ नेनेहन॰ आधये॰ यद्य

॥श्रीमन्नारायणः॥श्रीजानकिर्जयतुतराम्॥श्रीमन्नारायणः॥श्रीमन्नारायणायनमः॥द्व्येकयोरि
त्यादिनियमात्प्रथमार्थःसङ्ख्या।यत्तुएकत्वादिकमपिप्रकृतेरेवार्थः।एकवचनादिकन्तुद्योतकमेव
नन्वेवङ्घटइत्यादावेकत्वविशिष्टोघटइतिबोधानापत्तिः।पदद्वयघटितायाआकांक्षायाविरहात्।
अन्यथाहरिपदोपस्थितयोरश्वसूर्य्ययोःपरस्परमाधाराधेयभावेनान्वयबोधापत्तेरितिचेन्न।
धात्वुपस्थाप्ययोःफलव्यापारयोरिवएकपदोपस्थाप्ययोरपिव्युत्पत्तिवैचित्र्येणान्वयसम्भवा
दितितन्न।अनन्तप्रकृतीनांवाचकत्वापेक्षयास्वल्पतरप्रत्ययानांवाचकत्वेलाघवात्।अत्रवद
न्ति।विभक्तीनांसार्थकत्वेसमानविषयकानुमित्यादिकम्प्रतिशाब्दसामग्रीप्रतिबन्धकतयाम्
प्रातिपदिकजन्यार्थयाद्युपस्थितिविभक्तिजन्यासंख्योपस्थितिश्चप्रवेश्यातयोश्चमिथोविशेष्य

विशेषणाभावेविनिगमनाविरहात्प्रतिवन्ध्यप्रतिवन्धकभाववाहुल्यमितितन्न।एकत्वादिबो
धम्प्रतिविभक्तिजन्योपस्थितेर्हेतुत्वाभावेनिर्विभक्तिकादपिशाद्बोधापत्तेः।नचप्रत्ययानां
वाचकत्वेप्रकृतिप्रत्ययार्थयोःप्रत्ययार्थस्यैवप्राधान्यमितिनियमभङ्गइतिवाच्यम्।तस्यक्वा
चित्कत्वात्।अतएवपचतिकल्पमित्यत्रपाकेईषदूनत्वस्यान्वयः।ननुप्रत्ययस्याप्राधान्येपशु
नायजेतेत्यत्रैकत्वमविवक्षितमितिसिद्धान्तासङ्गतिरितिचेन्न।विधेयत्वेनप्रधानपशोरान्वस्य
भावात्।ग्रहंसंमार्ष्टीत्यत्रतुप्रधानसम्मार्जनानुरोधेनाप्रधानस्यग्रहस्यावृत्तिर्भवतीत्यवि
वक्षितमेकत्वम्।अथवेदाःप्रमाणमित्यत्रकथमेकवचनमितिचेन्न।चतुर्ष्वपिवेदेषुप्रामाण्यत्वस्यै
कत्वात्।अतएवाग्नीषोमौदेवतास्येत्येकवचनेनविग्रहस्तत्रापिदेवतात्वस्यैकत्वात्।ननुपदा

र्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति न्यायात् कथं पदार्थतावच्छेदके एकत्वान्वय इति चेदत्रा
हुः स्तम्भ्यो व्रीहिरित्यादौ व्रीहित्वादि जाता एकत्वान्वयेनोक्तानियमसंकोच आवश्यक इति। अत्रे
दमित्यपने। व्यक्तावेव शक्तिस्वीकारात् कथं जातेरेकदेशत्वम्: ननु तथापि जातौ कथं संख्यान्वयः।
प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वादिति चेत् सत्यम्। प्रकृत्यर्थत्वं प्रकृतिजन्यबोधविषय
त्वम्। अस्ति च प्रकृत्यर्थतावच्छेदकेपि प्रकारतानूपा विषयतेति। एवं शतादिपदोत्तरसंख्याया अ
विशतत्वादावेवान्वयः। अत एवैकशते शतानीति न प्रयोगः। तदुक्तम्। विंशत्याद्याः सदैकत्वे सर्वाः
संख्येयसंख्ययोः। संख्यार्थे द्विबहुत्वे स्तः इति शतादिशब्दानां संख्यासंख्येयोभयार्थत्वात्। शतं ब्रा
ह्मणाः। ब्राह्मणानां शतमित्युभयथा प्रयोगः। गवां शतं शुक्लमित्यत्र तु सामानाधिकरण्येन शुक्ला

न्ययः।आदशानः संख्यास्त्वङ्ख्येयेइत्यनुशासनात्।ग्रामणीदशाइत्येवप्रयोगोनतुग्रामणीनां
दशेति।शतानीत्यत्रप्रथमोयस्थित्वाच्छत्वत्रयमेवार्थः।व्याकरणेतुकपिञ्जलाधिकरण
न्यायोनाम्नीपतेः।निजान्त्रयाणामितित्रिग्रहणात्।चैत्रोमैत्रश्चगच्छतइत्यत्रतुआख्या
ताद्द्विवचनस्यैवद्वित्वबोधकत्वम्।एकोऽत्रसःपश्यन्नोकाभवतीत्यादौतुप्रकृतिसमानवच
नकत्वमेवतदाहुः।गच्छन्तीतियावत्।संख्याप्रकृतेर्विकृतेर्नहीति।नचैवममानितसेननि
तापशोयुगद्विकाःस्वबद्धाश्चिकुराःशिरस्थितमित्यत्रयशोयुगसमानवचनकत्वङ्कथंमम
नीत्यस्येतियावत्।अपशोयुगंचिकुराअमानीत्यर्थात्।कर्मणिद्वितीयेत्यनुशासनाद्दाम्नयमा
त्रन्द्वितीयार्थः।यत्तुफलंद्वितीयार्थएव।अन्यथासमानविषयकानुमित्यादिकम्प्रतिशाब्दसामग्री ॥२८॥

प्रतिसंबंधकतायाम्फलप्रकारतानिरूपितव्यापारविशेष्यताशालिधातुजन्योपस्थितित्वेननि
वेशः।व्यापारविशेष्यतानिरूपितफलप्रकारताशालित्वेनचेत्यत्रविशेष्यविशेषणभावेविनिगम
नाविरहापत्तिरिति।तन्न।सकर्मकत्वाकर्मकत्वविभागानापत्तेश्चदेवदत्तोग्रामंगच्छतीत्यत्रदेवदत्त
स्यकर्मतावारणायव्यापारव्यधिकरणफलेविशेषणम्।यत्तुपरपाकर्तृसंज्ञपाधायइतितन्नाक
र्मद्रूतरेभ्योभिद्यतेफलाश्रयत्वादितीतरभेदानुमितौव्यभिचारात्फलाश्रयत्वस्यकर्तर्यपिसत्वा
त्।भूमौपततीत्यत्रकर्मतावारणायाश्रयान्वयधिन्नत्वंफलेविशेषणम्।अतएवयातयामात्यभू
तजेद्इतिप्रयोगः।नरकंपतितइत्यत्रपतगतावित्यस्यतस्यप्रयोगः।पतत्यधोधामविसारिसर्वत
इत्यत्रतुअधोविसारिधामसर्वतःपततीत्यर्थः।वस्तुतस्तुअत्यधःपततीत्यर्थः।ननुघ्रागंधो

पादानइत्यत्रापिगंधरूपाश्रयावच्छिन्नत्वात्कर्मत्वानापत्तिरितिचेत्सत्यम्।विषयताजनकव्यापार
एवजिघ्रत्यर्थःनतुगंधज्ञानानुकूलव्यापारःगंधज्ञानरूपफलस्यकर्मण्यभावात्।ननुकथंपुष्पं
जिघ्रतीतिपुष्पेविषयतायाअभावात्इतिचेत्पुष्पत्वात्सगंधेपुष्पशब्दस्यलक्षणा।प्रयागात्काशीं
गच्छतीत्यत्रप्रयागस्यकर्मतावारणायधात्वर्थाच्छेदकस्पन्दनेविशेषणम्।यत्तुनिरवकाशापादान
संज्ञाबाधतइतितन्नागमनान्निवर्ततइत्यादावकर्मयोगेपादानत्वस्यचरितार्थत्वात्।गेहेतिष्ठस
तीत्यत्रगृहाधिकरणकस्थितिविषयिणीइच्छेत्यर्थात्तस्तत्प्येवनतुइच्छाकर्मकत्वमादायद्विती
या।पाकंचिकीर्षतीत्यत्रतुइच्छाकर्मत्वस्यैवाभिधानान्नद्वितीया।पुत्रीयतीत्यत्रतुपुत्रादिकर्म
णोन्तर्भूतत्वादकर्मकत्वंतत्रापुत्वंपाकीयतीतित्वनभिधानान्नप्रयोगः।पाकेत्यादिकस्योगेतएव

ञस्यपाकीयतीतिषष्ठी।जानातेरावरणभंगानुकूलोव्यापारोऽर्थइतिकेचित्तन्न।ईश्वरोजानातीतिप्रयो
गानापत्तेः।नहिईश्वरस्यावरणमस्ति।ज्ञानानुकूलोव्यापारइत्यपिन।ज्ञानानुकूलचक्षुर्घटसंयोगादिरू
पव्यापारवत्वाद्घटोजानातीत्यापत्तेः।आत्ममनोयोगएवव्यापारइत्यपिनमनोजानातीत्यापत्तेः।घटचक्षुःसं
योगविनापिजानातीतिप्रयोगापत्तेश्च।आश्रयत्वमेवव्यानइत्यन्ये।ननुज्ञानोत्पत्तेःप्रागाश्रयत्वाभा
वात्वात्कथंव्यापारइतिचेत्सत्यम्।ज्ञानजननसामर्थ्यरूपःशक्तिविशेषश्चाश्रयत्वम्।वस्तुतस्तुविष
यताफलंज्ञानमेवव्यापारः।तार्किकास्तुजानातीत्यादीनांज्ञानादिमेवार्थःविषयत्वंद्वितीयार्थः।विषय
ताश्रयत्वंगौणंकर्मत्वमित्याहुस्तन्न।घटायपतनेइत्यत्रातिव्याप्तेः।यत्तुव्यवहारस्यगौणत्वेपिनतत्र
द्वितीयादिसंभवःनहिगंगाशब्दस्यतीरेभाक्तत्वेपितेनज्ञानादिकर्तुंशक्यतइतितन्न।नागीत्यादौगौणे

पिडीषु दर्शनात् पत्राणि विभजते इत्यत्र विभागरूपफलाश्रयत्वात् द्वितीया वृक्षाद्विभजते इत्यत्र तु
पृथग्भवनमेवार्थ इति न द्वितीया घटो भवतीत्यत्र उत्पत्तिरूपकफलाश्रयत्वेपि व्यापारसमानाधि
करणत्वान्नात्र द्वितीया ननु आश्रयत्वं कथं व्यापारः उत्पत्तेः प्राक् तस्याभावादिति चेत् सत्यम् उत्पत्ति
व्यवहारानुकूलं संस्थानमेवाश्रयत्वं सत्तात्वात्माधारणानुकूलव्यापारः। आत्मशब्दः स्वरूपवाची
।यत्व कर्मकानां व्यापारमात्रवाचित्वमिच्छंति तार्किकाः। शाय्यन्ते इत्यस्य शाययनानि क्रियन्ते इत्यर्थनि
भ्युपगमे हलधारिकाः शाय्यन्ते इत्यत्र क्रियाविशेषणस्य कर्मत्वानापत्तेः। अत्र हलानां शाययनानीव शा
यनानीत्यर्थ द्विहुत्वं स्त्रियां क्तिनित्यर्थविकारात्सामान्येन पुंसकमित्यस्य बाधः। आख्यातवाच्यक्रिया
या एकत्वन्तु प्रापिकम्। ननु नीलं घटं करोतीत्यादौ कथं नीलादेर्घटादावन्वयः। कारकाणां क्रिये

यान्वयइतिनियमात्तानीत्वङ्कुरोति घटंकरोति पृथगन्वयाभ्युपगमेपि कटएवकर्म्मेतित्तत्समानाधिक
रणाङ्गीष्मादिभ्योपिद्वितीयेतिपक्षेतदसिद्धेरितिचेदत्राहुः।विशेष्यद्वाराक्रियाजनकानांविशेष्यद्वारा
क्रियान्वयइति· ननुकाशीङ्गच्छन्नपिमृतइत्यत्रकथङ्कर्मतेतिचेन्नाइच्छाविषयत्वसत्वात्· नन्वेवंयत्र
ग्रामगमनोद्देशेनखड्गाभिघातेकृतेदैववशाज्जीवतितत्रतद्व्यापारस्यमरणाननुकूलत्वाभावान्नसम्पूर्णप्रा
यश्चित्तमितिसिद्धान्तासङ्गतिरितिचेत्· सत्यम्· तत्रेच्छाविषयत्वाद्धिंसास्त्येवकिन्तुमरणाभावान्नस
म्पूर्णप्रायश्चित्तम्· अतएवानोद्देशेनखड्गाभिघातेकृतेभ्रमाद्ब्राह्मणमरणेनसम्पूर्णप्रायश्चित्तम्
घटंकरोतीत्यत्रोत्पत्तिरूपफलाश्रयत्वात्कर्म्मतायत्नार्थत्वेयतिपदस्यकर्मकतापत्तेः· यद्धातुसमभिव्या
हारेकर्माकांक्षानियतासधातुःसकर्मकः· अस्तिचकरोतौकर्माकांक्षानियतानतुयतधातावितिं· तन्न·

अन्योन्याश्रयापत्तेः·तण्डुलम्पचतीत्यत्राधिकरणसञ्ज्ञातुनभवतिपरत्वात्कर्म्मसञ्ज्ञायाबाधादि
तिसिद्धान्तः।नन्वेवंग्रामङ्गच्छतीत्यपिप्रयोगोनस्यादितिचेत्·सत्यम्·गमनक्रियाहिकर्तृद्वाराग्रा
ममात्रपर्य्याप्तिर्भवतिसप्तमीपाकक्रियातुतण्डुलमात्रपर्य्याप्तितिवैषम्यम्·स्यादेतत्।हरिशब्दोच्चा
रणेयुगपत्सर्वेषामप्रतीतेः।सकृदुच्चरितइतिन्यायः।तत्रचनिराकाङ्क्षमेववीजन्तथाचकथंफ
लव्यापारयोर्युगपद्बोधः।अथसकृदित्यस्यैकवारमर्थम्बोधयतीत्यर्थोनत्वेकमितिचेत्·हरिशब्द
दप्येकवारंसकलार्थबोधापत्तेरितिचेन्न।फलव्यापारयोर्व्यासज्यवृत्तेरेकस्याएवशक्तेःस्वीकारा
त्·पच्यतेतण्डुलःस्वयमेवेत्यादिवद्गम्यतेग्रामःस्वयमेवेत्यादौनप्रयोगः।तदुक्तम्।निर्वर्त्त्यचवि
कार्य्यंचकर्म्मवद्भावदृश्यते·नतुप्राप्येकर्म्मणीति·गुणान्विभजतेइत्यत्रविभागरूपफलाश्रयत्वस्या

सम्भवेपि भेदबोधनाविषयत्वैव फलम्॰ रूपं रसात्पृथगित्यत्र विभागाश्रयत्वाभावेपि भेदावधित्वम
स्त्येवा एकं रूपमित्यत्राभेदरूपमेकत्वं सामानाधिकरण्येन याप्रतीयते गुणे गुणाङ्गीकारात्॰ मासमास्तेइ
त्यत्राकर्मकधातुभिरितिकर्मत्वम्॰ नन्वेवङ्क्रोशोहम्पठतीतिकथम्॰ सत्यम्। पाठेन गोदोहं व्याप्नोतीत्यर्था
त्कर्मतात्तदुक्तं हरिणा देशकालाध्वभावानामन्तरभूतक्रियान्तरैः। सर्वैरकर्मकैर्योगे कर्मत्वमुपजा
यत इति॰ पूर्वकाले आसीत्वा एकादश्यां रात्रौ जागृयादितिप्रयोगस्तु अधिकरणत्वविवक्षाया पूर्वम्भूत
इत्यपि उक्तवार्त्तिकेनैव कालाध्वनोरित्यस्य तु न प्राप्तिः अत्यन्तसंयोगाभावात्। भ्रान्तं देशमित्यत्र तु
गत्यर्थाकर्मकेतिकर्तरि क्ते कर्मनिर्वाधम्। अयं योगः शक्यो कर्तुमित्यत्र शकेरकर्मकत्वेपि तुमुनन्तधा
त्वक्रियाकर्मणि लकारः। तृतीयायास्तु व्यापाराश्रयस्यार्थः॰ रामेण बाणेन हतो वालीत्यत्र बाणनिष्ठो

व्यापारस्तृतीयार्थएवदण्डेनघटेनेत्यत्रहेतुत्वमेवतृतीयार्थइतिकारकविभक्त्यभावादक्रिययापि
योगःजनिकर्तुरित्यपादानत्वविवक्षायान्दण्डाद्घटइत्यपिप्रयोगःयत्तुतत्रउपादानस्यैवग्रहणमिति
तन्न·गोमयाद्वृश्चिकाजायतेइतिभाष्योदाहरणमात्रेणतथाकल्पनेमानाभावात्।यद्यपिप्रकृति
शब्दउपादानमात्रेणप्रसिद्धस्तथापिपुत्रात्प्रमोदोजायतइत्यादि।प्रयोगानुरोधात्कारणमात्रपरः।
ननुधूमादग्निमानित्यत्रधूमस्यकथंहेतुत्वमितिचेन्न।धूमादग्निमानुज्ञायतइत्यर्थात्।धूमशब्द
श्चधूमज्ञानपरः।अतीतानागतधूमज्ञानादप्यनुमित्युदयात्।चतुर्थ्यास्तादर्थ्यमेवार्थः।शिष्या
यचपेटान्ददातीतिभाष्यप्रयोगात्।एवंभार्यायैस्थालींददातिभिक्षायदत्तम्प्रेषयतिशत्रवेःस्वत्वमु
ज्यतीतिवद्रजकायवस्त्रन्ददातीत्यपिशेषत्वविवक्षायान्तुरजकस्यददातीत्यपिअजांग्रामायेति

नभवतिअनुद्देश्यत्वात्।ननुश्राद्धादावपिपितृभ्योददातीत्येवप्रयोगापत्तिःनस्यात्तत्रब्राह्मणेभ्योदद

तीति।परन्तुस्वीकाराभावात्पित्रादीनांसम्प्रदानत्वमितितन्न।सूर्य्यायार्घन्ददातीत्यादावपितुल्यत्वा

दितिचेन्न।देवजन्यफलभागित्वेनब्राह्मणानामेवोद्देश्यत्वात्।सूर्य्यायेत्यत्रतुददातिस्त्यागार्थः।अ

र्घोनामगन्धोदकादिसमुदायः।षष्ठ्यास्तुसंबन्धएवार्थः।साचप्रकृतिप्रत्ययार्थयोरितिन्यायाद्राज

शब्दादेवास्यादेतत्।स्वत्वसम्बन्धेनैवराजादीनांपुरुषादावन्वयसम्भवात्षष्ठ्याःसम्बन्धार्थत्वेमाना

भावइतिचेन्न।नामार्थयोरभेदइतिनियमात्।नियमफलन्तुघटःकर्मत्वमानयनंकृतिरित्यत्रशा

ब्दबोधाभावः।तत्रहिअभेदोन्वयोबाधितः।ननुअभेदोनसंबंधः।राहोःशिरइत्यत्रौपाधिकभेदमा

दायैवभाष्येषष्ठ्याउपपादनात्।सत्यम्।अभेदःषष्ठ्यर्थोनभवतिसंसर्गमर्य्यादयातुअभेदस्यभा

नं न्वयत्येव। अत एव वीरः पुरुष इत्यत्र सामानाधिकरण्यं स्यात् प्रथमा न प्राप्नोतीत्याशंक्य पर
त्राधिकृत्य स वाक्यार्थ इति समाहितं भाष्ये वाक्यार्थ इत्यस्य संसर्ग इत्यर्थः। पदार्थानां संसर्गो
वाक्यार्थ इति सिद्धान्तात्। तस्मात् षष्ठ्यर्थसम्बन्धस्य प्रकारतया भानं भूतलस्याधेयतासम्ब
न्धेन घटेऽपि सत्वाभूतत्वादेः प्रकारत्ववारणाय संयोगादेः सांसर्गिकविषयतास्वीकारस्याव
श्यकत्वात्। संयोगनिष्ठासांसर्गिकविषयतानिरूपितप्रतियोगित्वमेव प्रकारत्वम्। एवम्भ्या
भेदनिष्ठसांसर्गिकविषयताप्रतियोगकत्वाची ल्वादेः प्रकारता सिध्यति। एवं स्वत्वादिकम
पि सम्बन्धः। आश्रयतया पुरुषे द्रव्यनिरूपकतया राजन्यपि सत्वात्। एतेन एकमात्रनिष्ठत्वा
न्न सम्बन्ध इत्यपास्तम्। संयोगानुयोगित्वमेवाधेयत्वमतः कुण्डे बदर इति वत् बदरे कुण्ड इति

प्रयोगः। पचला चैत्रेण भुक्तमित्यत्र यस्य च भावेनेति सप्तमी न भवति। अन्यकर्तृकक्रियाया ग्रह
णात्। स्तोकम्पचतीत्यादौ क्रियाविशेषणे कर्मणि षष्ठी न भवति· कर्तृसाहचर्यात्। भेदेनान्वितस्य
कर्मणो ग्रहणं दधि पश्येत्याद्यनुरोधेन संख्यापि प्रातिपदिकार्थ एवेति केचित्। तन्न। तत्राहि राजपु
रुष इत्यादाविवाभेदैकत्वमेव प्रतीयते संख्यासामान्याभाव इति यावत्। इरियानित्यादौ प्रकृत्यस्ये
व दधि इत्यत्र कर्मत्वस्याप्यनुसन्धानात्कारकमपि न प्रातिपदिकार्थः। समासादौ तु समुदायस्यै
व शक्तिः। यत्तु समुदायशक्तिस्वीकारे मानाभावः। राजशब्दस्य सम्बन्धिनि लक्षणया मेकदेशत
या विशेषणान्वयासम्भवात्। अत एव गोरथो निष्कौशाम्बिरित्यादौ न युक्तादिपदप्रयोगः। राजस
म्बन्धवानित्यर्थविवक्षायां वाक्यस्यैव सम्भवासमासविकल्पोपि नावश्यकः। पङ्कजशब्दादौ तु कु

मुदादिबोधकारणीयसमुदायशक्तिः। नच गोपदस्य चित्रगवीस्वामिनि लक्षणया प्रत्ययानाम्प्र
कृत्यर्थान्वितस्वार्थबोधकत्वमिति न्यायविरोधः समुदायस्यैव प्रकृतित्वादिति वाच्यम्। प्रत्ययानां
सन्निहितस्वार्थबोधकत्वस्यैव नियमात्। उपकुम्भमित्यादावपि कुम्भपदस्य लक्षणया उक्तनि
यमस्य भङ्गाभावादिति तत्त्वम्। समुदायशक्त्यभावे प्रातिपदिकानापत्तेः। ननु समासग्रहणात्प्राति
पदिकत्वमस्तु वाक्यत्वर्थवत्त्वाभावादेव न प्रातिपदिकत्वमिति चेन्न। मूलकेनोपदंशमित्यत्र कृद्ग्र
हणपरिभाषया प्रातिपदिकत्वापत्तेः। ननु कृत्तद्धितसूत्रेप्यर्थवत्पदमनुवर्त्तत एव। अन्यथा कृ
त्तद्धितान्तग्रहणानापत्तिः। तथा चार्थवत्त्वाभावादेव न प्रातिपदिकत्वापत्तिः। किंच वाक्यविष
येपि समुदायार्थस्वीकारे तत्रापि नञ्कृदादिविशेषणयोगानापत्तिरिति चेन्न। कृदन्तं यदर्थवदि

त्यर्थाभ्युपगमे विरुद्धन्तान्तस्याप्यर्थवत्त्वेन विशेषणे तत्समानाभावात्। वाक्यस्य त्ववयवार्थेनैवार्थ
वत्त्वम्। विग्रहसमासयोर्विशेषणविशेष्यभावसाम्यन्तु न नियतम्। पचतीति पाचक इति वत्त्वात्त
दाहुः। आख्यातन्तद्धितकृतौ यत्किञ्चिदुपदर्शकम्। गुणप्रधानभावस्य तत्र दृष्टो विपर्यय इति।
सरयूपारीण इत्यत्र नित्यसापेक्षत्वादेकदेशेऽप्यन्वयः। राष्ट्रावारपाराद्घखावित्यत्र तदन्तविध्य
भावात्। अथ भोक्तुम्याक इत्यत्र नित्यसापेक्षत्वाभावात्कथमेकदेशे धात्वर्थे तुमुनादेरन्वय इति
चेन्न। तत्र पाकादेरेव विशेष्यतयैकदेशत्वाभावात्। समुदायशक्तिस्वीकारे उपसर्जनत्वादित्य
यद्वारो भूतपूर्वगत्या। क्रियावचनधात्वर्थः। तद्वाचकस्य धातुत्वेऽन्योन्याश्रयापत्तेः। किन्तु व्यापारसमु
दायः। पचतीत्युक्ते सर्वेषां व्यापाराणां प्रतीतेः। कथं तर्हि स्थाली पचति पश्यति भवइत्यादि न हि स

फलव्यापारस्तत्रास्तीति चेत्सत्यम् । एकदेशो समूले वा व्यापाराणामपयादयः स्वभावतः प्रवर्त्तन्ते
तुल्यवद्रूपं समाश्रिता इति वाक्यपदीयरीत्या एकदेशोऽपि धात्वर्थः । धातूनामनेकार्थत्वमिति हि
तस्याश्रयः फलस्य क्रियावत्तु क्रियत इति क्रियेति योगात्तावद्यपि निराकाङ्क्षत्वे एकदे
शान्वयाभावे बीजमूलं तथापि नित्यसाकाङ्क्षाकाङ्क्षायाश्च शान्तत्वान्न दोषः । ननु रथो गच्छ
तीत्यादौ लक्षणाश्रयणे कथं वर्त्तमानादीनामन्वयः । युगपद्वृत्तिद्वयानभ्युपगमात् । न चैव
ङ्गङ्गायां घोषमत्स्यादिवत्त्रोभयबोधनापत्तिरिति वाच्यम् । तत्रावृत्त्या उभयबोधात् । प्रा
कृदयप्रयोगस्यैव तात्पर्यग्राहकत्वादिति चेन्न । रूपभेदेन शक्यलक्ष्ययोर्बोधकत्वात् । न
नु लक्षणाश्रयणे एकत्र गौरवमन्यत्र सर्वत्रेति चेन्न । आख्यातत्वेनैव कर्त्तरि शक्तता या

भिन्नकार्य्यकारणभावात्। आख्यातशब्देनात्र तिङुच्यते भावप्रधानमाख्यातमित्यत्र तु आ
आयते प्रधानीभूतोऽर्थो निर्वर्तते येनेत्यस्य व्युत्पत्त्या तिङन्तमुच्यते। नामान्याख्यातजानीति भाष्ये तु आ
ख्यातावयवत्वादाख्यातशब्देन धातुरुच्यते। अत्र तिङ्क्षु वाचकताया उकारे आरोपाद्धक
त्ताणां वाचकव्यवहारः। यत्तु स्थानिनामादेशानां वाचकत्वमिति विचारो निष्फलः एव कल्पित
वाचकतया उभयत्र तुल्यत्वात्। वास्तविकवाचकतायास्तूभयत्राभावात् इति तन्न। बोध
कतानुपायाः शक्तेरवयत्वेन कल्पितेषु तिवादिष्वेव सत्त्वात् कल्पितानामनन्ततया तत्र शक्ति
कल्पनाया एवासम्भवात्। यत्तु व्याकरणभेदेन स्थानिनाम्भेदेन स्थानिनाम्भेदेऽपि न क्षतिः
लिपीनाम्भेदवदिति तन्न। विनिगमनाविरहात् लिपीनां स्मारकत्वकल्पनेऽप्यादेशानामननुगता

नामेवास्मात्कर्तृत्वकल्पने सम्भवति अनुगतकल्पनाया अन्याय्यत्वात् वर्त्तमानादीनान्तु व्या
पार एवान्वयः। न त्वामेवात्तजडीकृतकलेवरस्यापि उत्थानानुकूलयत्नवत्त्वादुत्तिष्ठतीति प्रयो
गापत्तिरिति वाच्यम्। तद्यत्नस्य तदुत्थानानुकूलत्वाभावात्। ननु देवदत्तः पचतीत्यादौ यात्मगा
मिक्रियाफलेकधर्म्मपरस्मैपदम्। तदुक्तम्। प्रायस्यार्थस्य प्रसिद्ध्यर्थमारभ्यन्तेपवादयः। तत्प्रधा
नम्फलं तेषाञ्चलाभादिप्रयोजनमितीति चेत्सत्यम्। यत्करोषीति भगवद्वचनादत्त्यैवपरगामि
त्वम्। तदुक्तं हरिणा। क्रियाप्रवृत्तावपि स्यात्ता केश्चित्स्वार्थपरार्थता। असती वा सती यापि विवि
क्षितनिबन्धनाइति· यजमाने यजतीत्यत्र तु सामग्रीसम्पादनमेवार्थः। वैदिके कर्मणि तु आरो
पस्यान्याय्यत्वादहं पचे इत्यादिप्रयोगः पदसंस्कारेण ध्वः करिष्यतीति प्रयोग इत्येके। यद्यपिश्वो

ऽग्नीनाधास्यमानेनेत्यत्रानघत इति योगविभागेन ल्यप् साधितो भाष्ये तथापि बाहुलकात्
ध्रुवः करिष्यतीत्यपि प्रयोग इति भाष्ये। ब्राह्मणार्थम्पयघ्रीत्यत्र तु अर्थशब्दस्य नपुंसकत्वं वाच
निक एव अर्थेन नित्यसमास इति वचनात्। किमर्थमिदमुच्यते इत्यत्र तु क्रियाविशेषणत्वात्स
मान्येन नपुंसकं। योगादिना समानाधिकरणे तु किमर्थो योग इत्यपि। ननु कोऽर्थो यस्येति बहु
व्रीहिणा सिद्धत्वाद्वार्त्तिकं व्यर्थमिति चेन्न। महदर्थमित्यात्वापत्तेः। ब्राह्मणार्थं गवार्थे वा इत्यत्र तु
ब्राह्मणस्यार्थ इति षष्ठीतत्पुरुषः। ननु गुवर्थमत्यर्थो यादौ विशेष्यलिङ्गता प्राप्नोतीति चेत्स
त्यम्। भाष्ये सर्वलिङ्गता वक्तव्येत्येव पाठः। एवञ्च विशेष्याविवक्षायां नपुंसकत्वमेवा। नरर्थं
विवृतेः प्रवृत्ताविति सूत्रे तु तदर्थायां विवृत्तावित्येव विवक्षितत्वात्सप्तम्याः स्थाने प्रथमेति

व्याख्यानं युक्तमेव। यत्तु तत्तु अर्थेनेति वचनं व्यर्थमिवाचतुर्थ्यो कसारेयार्थशब्दस्य प्रयोगा
सम्भवात्। ननु जातिपक्षेण सरूपसूत्रप्रत्याख्याने द्विवचनापत्तिः जातेरेकत्वादिति चेत्सत्य
म्। सर्वव्यक्तिग्राहिकेति जातिपक्षस्यार्थः। एकव्यक्तिग्राहिकेति व्यक्तिपक्षस्यार्थ इति वैयाक
रणानाम्पारिभाषिकः सङ्केतः। चादीनां द्योतकत्वमेव वा इत्याद्यपि स्त्रीत्वबोधात्। ननु
अजाद्यादौ स्त्रीत्वद्योतनापत्तौ यत्तु खट्वादीनान्तु नियतलिङ्गानान्द्योतकापेक्षाया अभा
वात्कथं णत्वमिति चेन्न स्त्रियां वर्त्तमानात्प्रातिपदिकाट्टाप्साधुरित्यर्थत्वात्। ननु द्योतकत्वे का
र्त्तिकपञ्चमीत्यादौ पूरणगुणेति निषेधापत्तिरिति चेन्न। पूरणमात्रार्थे परत्वे एव तत्प्रव
त्तेः। वयन्तु विभावयामः। चादीनां वाचकत्वमेवास्तु वा इत्यादौ लिङ्गानुशासनपर्यालोच

न स्यावश्यकत्वतयात थैव स्त्रीत्वसम्भवात् प्रत्ययार्थः प्रधानमितिन्यायस्तु क्वाचित्क एवेति।
यद्यपीदं सूत्रन्नथापि पाणिनिना प्रत्याख्यातमेतत्। प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाण
त्वादिति। प्रत्ययार्थः प्रधानमितिवचनञ्च कार्य्यमर्थस्य लोकतः प्रसिद्धत्वादिति तदर्थः। लौकिकस्य
लिङ्गस्य स्वर्गादावभावेपि पारिभाषिकलिङ्गं सर्वत्रास्ति· अयमत्रार्थः इयं व्यक्तिः इत्यादि त्रिविध
व्यवहारस्य सर्वत्र दर्शनात्। स्वर्गादिशब्दस्यापि यत स्त्रीत्वन्तु लिङ्गानुशासनादिति सिद्धान्तः।
अत्र लौकिकलिङ्गमर्थनिष्ठमेवास्तु पारिभाषिकन्तु शब्दनिष्ठमेवेत्युक्तौ न कोपि विशेष इति चि
न्त्यम्। अथैवं स्वरेषु प्राप्तरूपायाः शक्तेः समवायेन स्वरमात्रवृत्तितया कथम्प्रत्यादिवृत्तित्वं विषयतये
ति चेत् न स्यात्। अर्थशब्दयोरुभयोरपि तुल्यत्वात्। यत्तु बोध्यत्वप्रकारकेच्छा विषयत्वमर्थ एव बो

धकत्वप्रकारकेच्छाविषयत्वं शब्द एवेति तन्न । अर्थस्यापि शक्त्याश्रयत्वेनाश्रयमर्थः शक्त
इत्यपि व्यवहारापत्तेः । एतेन मुख्यविशेष्यतार्थ एव न शब्दे इत्यपास्तम् । यत्तु आश्रयतासम्ब
न्धेन शक्तिः शब्दनिष्ठोपकता सम्बन्धेनार्थे अत एव शब्दोपि शाब्दबोधे विषय इति तन्न । अत्र
हि शब्दार्थत्वमनयोर्हर्यादिशब्द इव नानार्थविधया वाच्यत्वं वा फलव्यापारयोरेव धात्वर्थस्य प्र
त्तिभाक्त्वं वा । नाद्यः । युगपद्बोधानापत्तेः । न द्वितीयः । अनुकरणदशायां शब्दमात्रबोधानापत्तेः
किं त्वेवं शब्दस्वरूपमपि शक्यतावच्छेदकमिति सिद्धान्तासङ्गतिः । अकारणस्य कारणतावच्छे
दकत्ववत् शक्यतावच्छेदकत्वमिति सिद्धान्तः । तस्माच्छब्दनिष्ठैव शक्तिः ॥ अथ कथं घटशब्दस्य घ
टे शक्तिरिति व्यवहार इति चेत् । घटशब्दनिष्ठशक्तिविषयतनयाश्रयदेइति तदर्थः । अत एव क

र्गणिहितीयोत्यादावपिविषयतैवसम्बन्धः।साचव्यापारानुबन्धिनी।अतएवशास्त्रेज्ञानमि
तियद्दृष्टेज्ञानमित्यपिप्रयोगेबाधकाभावः।अर्थेशब्दइतिवच्छब्देऽर्थइत्यत्रापिबाधकाभावः
२तस्माद्बोधकत्वमेवशक्तिः।अनुकरणेनानुभूसत्तायामित्यादिनिर्देशादेवबोधकत्वमाप्तु
तात्पर्य्यस्यनियामकत्वादृष्टस्येतिनविशेषणोपमितितत्राहहस्तियकमानयेत्यादौसतितात्पर्य्ये
हस्तिनोपिबोधानापत्तेः।तस्मान्नानार्थस्थलेएवतात्पर्य्यस्यकारणत्वमनानुकथमर्थाध्याहारोप
स्थितिरितिचेन्न।एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमितिन्यायात्।उपसर्जनानुयाचकत्वा
भावेपिनितरांसुतरामित्यादौद्योत्यार्थप्रकर्षएवतरप्।विजयतेतरामित्यत्रापिवेरनर्थकत्वयाजय
नइतितिङन्तात्तरप्।निनरामधश्चुरित्यत्रापिअध्याहृतस्यायमादिपदस्यवाचकत्वाददोषः।आक्षलि

कत्वानुभावकमितिप्रवादस्यापिसर्वलोकसाक्षिकेकुमतिः पश्युरित्यादावित्थमेवनिर्वाहः। आध्याहारोना
ममानसज्ञानविशेषस्तत्रार्थस्यैवकार्ययोग्यत्वादर्थएवाध्याहृयतइतिमीमांसकाः। नन्वेवमैत्रस्तण्डु
लमित्यत्रतृतीयापत्तिस्तिङाकर्तुरनभिधानादितिचेन्नाशाब्दविशिष्टस्यैवार्थस्याध्याहारात्। तार्किका
स्तुपदान्यपदार्थोपस्थितेरेवशाब्दबोधेहेतुत्वान्नशब्दस्यैवाध्याहारइत्याहुः। नन्वेवम्प्रासादात्प्रेक्षतइत्यत्र
ल्यब्लोपइतिपञ्चम्यनापत्तिः। ल्यबन्तपदाभावस्यैवनियामकत्वात्। इतिचेन्नाशाब्दाप्रयोगस्यैवतत्रनि
यामकत्वात्। शाब्दिकास्तुफलेभ्योयातीत्यत्रतुमुन्नाप्रयोगेएवचतुर्थ्याःसाधुत्वविधानात्तत्रार्थएवाध्या
ह्रियते। एवंल्यब्लोपइत्यत्रापि। पुष्पेभ्यइत्यत्रतुस्पृहेरीप्सितइतिसम्प्रदानत्वसिद्धयेशब्दस्याध्याहारइत्या
हुः। नचैकस्यैवपदस्यभेदेनसाधुत्वमसाधुत्वञ्चायुक्तमितिवाच्यम्। यथोद्देशकार्य्यकालयोरिवव्यवस्थितत्वो

रेयप्रक्रियोपयोगित्यात्॥ ॥इति श्रीमद्दीपीरस्तात्मजरामसेवककतनूद्भवकृष्णाचार्यकृतौ यादचूडा
मणिः॥ ॥श्रीविश्वेश्वरायनमः॥ ॥

मा
पिसन्निपातपरिभाषयासिद्धे· तथाप्यव्ययानामभ्मा चट्टतिटिलोपापत्तिः व
स्तुनस्तुवहिरङ्गासिद्धाद्दोषः· यस्त्वाजीति· यहणेवतेन्यपिसमासप्रत्ययविधावि
त्य



२३